वन्मण्डलं स्वाद्यांशैर्यावद्भ्रामितं तावदुन्मण्डलमुत्तरगोले क्षितिजादुपरि लगति याम्येऽधः। यतस्तत्रस्थो ग्रहः स्वचरार्धासुभिरुन्नतिं नतिं च गतः। अतश्चरार्द्धस्य या वासना सैव पलोद्भवासूनाम्। स्फुटास्फुटक्रान्तिजयोश्चरार्धयोरन्तरे यावन्तोऽसवस्तावन्तः शरभवा इत्यर्थाज्ज्ञातम्। यतस्तयोरन्तरं शर एवं तुल्यदिक्के। यदा ग्रहता शरेणान्यदिक्कं नीता क्रान्तिस्तदा शरस्यैकं खण्डमुत्तरतोऽन्यद्दक्षिणतः। तयोर्योगे यतः शरो भवति। अतस्तज्जनितयोश्चरार्धयोर्योगे शरजनिताः पलोद्भवासवः स्युः। एवं हि महति शरे। अथाल्पे। ग्रहः किलोत्तरगोल उत्तरश्च तस्य शरस्तदाक्षवशाच्छरेण ग्रहस्य तदुन्नमनं तत् त्रैराशिकेन साध्यते। यदि लम्बज्यया कोट्याऽक्षवलनतुल्यो भुजस्तदा स्फुटशरतुल्यया किमिति। अत्र यत् फलं तद्ग्रहद्युज्यावृत्ते ज्यारूपं भवति। अथ वा लघुना क्षेत्रेणानुपातः। यदि द्वादशाङ्गुलकोट्या पलभा भुजस्तदा स्फुटशरकोट्या किमिति। फलं तुल्यमेव। अथ त्रिज्यावृत्त परिणामायानुपातः। यदि द्युज्यावृत्त एतावती ज्या तदा त्रिज्यावृत्ते कियतीति। फलस्य धनुः कर्तुं युज्यते। तच्छरस्याल्पत्वान्नोपपद्यत इति न कृतम्। आयनदृक्कर्मण्यस्फुटविक्षेपादसवः साधिताः इह तु स्फुटात्। तत्र कारणमुच्यते। तेन दृक्कर्मणा निरक्षदेशक्षितिजस्थो ग्रहः कृतः। तत् क्षितिजमन्यदेश उन्मण्डलम्। शरमूले यद्द्युज्यावृत्तं शराग्रे च यत् तयोर्वृत्तयोरुन्मण्डले यावदन्तरं तावान् स्फुटः शरः। स तु कोटिरूपः। अतोऽत्र कोटिरूपेण पलोद्भवा असवः साधिताः कृतायनदृक्कर्मको ग्रहोऽक्षवशात् प्रागुदित उदेष्यति वा यैरसुभिस्तेऽत्र पलोद्भवाख्याः। अथ याम्ये शरे तैरसुभिः क्षितिजादधःस्थो ग्रहो यावदुपरि क्षितिजं नीयते तावत् कृतायनदृक्कर्मग्रहादग्रतः क्रान्तिवृत्तं क्षितिजे लगति। यदि सौम्यः शरस्तदा तैरसुभिः क्षितिजादुपरिस्थो ग्रहः क्षितिजं यावदधो नीयते तावत् कृतायनदृक्कर्मकाद्ग्रहात् पृष्ठतः क्रान्तिवृत्तं क्षितिजे लगति। अत उक्तं शरे याम्योत्तरे क्रमविलोमविधानलग्नमित्यादि। एवं कृते उदयलग्नं जातम्। अस्मादुदयलग्नसाधनादस्तलग्नसाधनम्। यतो यैरसुभिर्विक्षेपेण प्राच्यां ग्रहः क्षितिजादुन्नास्यते तैरेव प्रतीच्यां नास्यते। यैर्नास्यते तैरेवोन्नास्यते। अथ प्रतीच्यां ग्रहेऽस्तं गच्छति प्राच्यां यल्लग्नमुदेति तदस्तलग्नम्। अतो भार्धाधिकात् खचरत इत्युक्तम्। इदं सर्वं गोलोपरि सम्यग्दृश्यते"।

**दृक्काण** न० ज्यो० उक्ते राशेर्दशांशरूपे तृतीयांशे द्रेक्काणे तथा च एकैकराशौ त्रयो द्रेक्काणास्तेन द्वादशराशिषु ३६ द्रेक्काणा भवन्ति मेषादिराशिस्थानां तेषां षट्त्रिंशतः क्रमेण स्वरूपाणि बृहज्जा० ३६ श्लोकैरुक्तानि यथा "कट्यां सितवस्त्रवेष्टितः कृष्णः शक्त इवाभिरक्षितुम्। रौद्रः परशुं समुद्यतं धत्ते रक्तविलोचनः पुमान्१। रक्ताम्बराभूषणभक्ष्यचित्ता कुम्भाकृतिर्वाजिमुखी तृषार्त्ता। एकेन पादेन च मेषमध्ये दृक्काणरूपं यवनोपदिष्टम्२। क्रूरः कलाज्ञः कपिलः क्रियार्थी भग्नव्रतोऽभ्युद्यत दण्डहस्तः। रक्तानि वस्त्राणि बिभर्त्ति चण्डो मेषे तृतीयः कथितस्त्रिभागः३। कुञ्चितलूनकचा घटदेहा दग्धपटा तृषिताशनचित्ता। आभरणान्यभिवाञ्छति नारी रूपमिदं वृषभे प्रथमस्य४। क्षेत्रधान्यगृहधेनुकलाज्ञो लाङ्गले सशकटे कुशलश्च। स्कन्धमुद्वहति गोपतितुल्यं क्षुत्परोऽजवदनो मलवासाः५। द्विपसमकायः पाण्डुरदंष्ट्रः शरभसमाङ्घ्रिः पिङ्गलमूर्त्तिः। अविमृगलोभव्याकुलचित्तो वृषभवनस्य प्रान्तगतोऽयम्६। सूच्याश्रयं समभिवाञ्छति कर्म नारी रूपान्विताऽऽभरणकार्यकृतादरा च। हीनप्रजोच्छ्रितभुजर्त्तुमती त्रिभागमाद्यं तृतीयभवनस्य वदन्ति तज्ज्ञाः७। उद्यानसंस्थः कवची धनुष्मान् शूरोऽस्त्रधारी गरुड़ाननश्च। क्रीड़ात्मजालङ्करणार्थचिन्तां करोति मध्ये मिथुनस्य राशेः८। भूषितो वरुणवद्बहुरत्नो बद्धतूणकवचः सधनुष्कः। नृत्यवादनकलासु च विद्वान् काव्यकृन्मिथुनराश्यवसाने९। पत्रमूलफलभृद्द्विपकायः कानने मलयगः शरभाङ्घ्रिः। क्रोड़तुल्यवदनो हयकण्ठः कर्कटे प्रथमरूपमुशन्ति१०। पद्मार्चिता मूर्द्धनि भोगियुक्ता स्त्री कर्कशारण्यगता विरौति। शाखां पलाशस्य समाश्रिता च मध्ये स्थिता कर्कटकस्य राशेः११। भार्याभरणार्थमर्णवं नौस्थो गच्छति सर्पवेष्टितः। हैमैश्च युतो विभूषणैश्चिपिटास्योऽन्त्यगतश्च कर्कटे १२। शाल्मलेरुपरि गृध्रजम्बुकौ श्वा नरश्च मलिनाम्बरान्वितः। रौति मातृपितृविप्रयोजितः सिंहरूपमिदमाद्यमुच्यते १३। हयाकृतिः पाण्डुरमाल्यशेखरो बिभर्ति कृष्णाजिनकम्बलं नरः। दुरासदः सिंह इवात्तकार्मुको नताग्रनासो मृगराजमध्यमः१४।